# संस्कृत वार्ता:

दिनाङ्क : 20.06.2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रपतिना द्रौपदीमुर्मु इत्यनया सह ओडिशा-राज्ये षड्शताधिकसप्तचत्वारिंशत्सहस्र- कोटिरूप्यकाणां परियोजनानां उद्घाटनम् अकरोत्।
- सर्वकारः सार्वजनिक-हिताय षोडश- निश्चित-मात्रा-औषध-संयोजनानां निर्माणम्, विक्रयणं, वितरणं च निषेधितवान्।
- श्वः निर्धारितायाः नीट-यू. जी. इति पुनःपरीक्षायाः प्राक् एन्. टी. ए. इत्यनेन राष्ट्रव्यापि मॉक्-ड्रिल् इत्याभ्यासः आयोज्यते।
- ऋतुविज्ञानविभागेन श्वःपर्यन्तम् उपहिमालयीय-पश्चिमबङ्गस्य सिक्किमस्य च पृथक्-पृथक् स्थानेषु अत्यधिकवृष्ट्यै रेड्-अलर्ट्- इति रक्तवर्णीया संचेतना दत्तास्ति।
- फीफा-विश्वकप इति क्रीडायां ब्राजील्-देशः हैति-देशम् त्रि-शून्यांकैः पराजय्य प्रथमवारं विजयमलभत्।

---

<u>प्रधानमन्त्रिणा-ओडिशा</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य ओडिशा-राज्यस्य प्रगतेः प्रशंसा कृता यत्र मुख्यमन्त्रिणः मोहनचरण माझिनः नेतृत्वे राज्येन वर्षद्वयं पूरितम्। सः अवदत् यत् एतत् राज्यं द्रुतगत्या विकासस्य मार्गे अग्रे गच्छति तथा च पूर्वीभारतस्य विकासाय महत्त्वपूर्णं योगदानं प्रददाति। मयूरभञ्ज-जनपदस्य रायरङ्गपुरे जनसमूहं सम्बोधयता, प्रधानमन्त्रिणा राष्ट्रपतये जन्मदिनस्य शुभाशयाः प्रदत्ताः, तस्याः पैत्रिकग्रामे पहाड़पुरे आगमनं सौभाग्यम् अस्तीति उक्तवान्। सः अघोषयत् यत् पहाड़-पुरं सूर्यग्रामरूपेण अथवा सौरग्रामरूपेण विकसितः भविष्यति, यत्र पुनर्नवीकरणीय-ऊर्जा-आधारित-संरचनाः, आधुनिक-सार्वजनिकसेवाः च भविष्यन्ति। प्रधानमन्त्री बहुविधक्षेत्रेषु प्रायः सप्तचत्वारिंशत्-सहस्र-कोटि-रूप्यकाणां विकास-

परियोजनानां उद्घाटनम्, शिलान्यासं च कृतवान्। सः अवदत् यत् केन्द्रस्य पूर्वोदयदर्शनस्य उद्देश्यं पूर्वीभारतस्य द्रुतगत्या विकासस्य माध्यमेन भारतस्य विकासं प्रवर्तनीयमिति।

राष्ट्रपतिः द्रौपदीमुर्मु इत्येषा प्रधानमन्त्रिणः नरेन्द्र मोदिनः नेतृत्वस्य प्रशंसाम् अकरोत्, सः स्वस्य दूरदर्शी-शासनस्य, विश्वनेतृभिः सह रचनात्मक-सहभागित्वस्य च माध्यमेन वैश्विक-मञ्चे भारतस्य प्रतिष्ठां प्रभावं च महत्त्वपूर्णरूपेण वर्धितवान् इति उक्तवती। एकां जनसभां सम्बोधयन्ती राष्ट्रपतिव्रया अवदत् यत्, प्रधानमन्त्रिणः मोदिनः नेतृत्वे भारतं निरन्तरं शान्तेः, संवादस्य, सहकारस्य च स्वररूपेण उद्भूतम् अस्ति।

---------------------------------------------------

## भारतीय-नौसेना/प्रधानमन्त्री

प्रधानमन्त्रिणा नरेन्द्रमोदिना श्वः कोलकाता-नगरे स्वदेशीरूपेण निर्मितत्रयाणां भारतीय-नौसेनायाः मञ्चीभूतानां आई. एन्. एस्. दुनागिरि, आई. एन्. एस्. संशोधक, आई. एन्. एस्. अग्रय इत्येतेषाम् समायोजनं भविष्यति।

---------------------------------------------------

## स्वास्थ्य-एफ़. डी. सी. एस. निषेधः

सर्वकारेण तत्क्षणप्रभावेण समानोपयोगाय षोडश- निश्चित-मात्रा-संयोजन-औषधानां निर्माणम्, विक्रयणं, वितरणं च प्रतिषिद्धम्। उपक्रमोऽयं सर्वोच्चन्यायालयेन निर्देशिते औषध-तान्त्रिक-परामर्शि-मण्डलेन स्थापितया विशेषज्ञसमित्या समीक्षायाः अनन्तरम् अभवत्। यस्मिन् ज्ञातम् यत् औषध-संयोजनानां चिकित्सात्मक-समर्थनस्य अभावः अस्ति अथ स्वास्थ्य-सङ्कटानि भवितुम् अर्हन्तीति। प्रतिबन्धितेषु उत्पादेषु कतिपयानि त्वक्-रोग-निवारकाणि, वेदना-निवारकाणि, एण्टिस्पास्मोडिक्, एण्टिबायोटिक्-आधारितानि च औषधानि सन्ति।

---------------------------------------------------

## एन. टी. ए.-मोक् ड्रिल्ः

श्वः भविष्यमाणायाः नीट-यू. जी. 2026 इति पुनःपरीक्षायाः सज्जतायाः भागरूपेण राष्ट्रिय-परीक्षण-संस्था (एन्. टी. ए.) राष्ट्रव्यापि मोक्-ड्रिल् इत्याख्यः कृत्रिम-परीक्षासञ्चालनमायोजयति। प्रातः नववादने आरब्धः अभ्यासः दिनपर्यन्तम् अनुवर्तते। राष्ट्रव्यापी-परीक्षा-केन्द्रेषु आयोजितेषु अभ्यासेषु सार्धद्वि लक्षतोऽधिकाः सुरक्षाकर्मिणः भागं गृहीतवन्तः। देहल्यां देहली-केण्ट्-क्षेत्रस्य अशोकविहारस्य च परीक्षा-केन्द्रेषु, अभ्यासोऽयं योजितः। परीक्षायाः सुगमं, सुरक्षितं, पारदर्शकञ्च आचरणं सुनिश्चेतुं एषा प्रक्रिया आयोज्यते। परीक्षा भारतस्य सार्धपञ्चशताधिकेषु नगरेषु विदेशेषु चतुर्दश-नगरेषु च एकोनाशीत्यधिकद्वाविंशतिः लक्षाधिकेभ्यः अभ्यर्थिभ्यः आयोजयिष्यते।

---------------------------------------------------

## शाह/ कोल्हापुर भ्रमणम्

केन्द्रीयः गृहमन्त्री अमितशाहः अद्य राष्ट्रियसुरक्षायाः प्रभावीसीमाप्रबन्धनस्य च विषये सर्वकारस्य प्रतिबद्धतां पुनः उक्तवान्। अवैधप्रवासस्य निवारणस्य प्रयत्नाः दृढनिश्चयेन निरन्तरं प्रवर्तन्ते इति सः उक्तवान्। श्रीशाहः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदीवर्यस्य नेतृत्वे भारते विगत द्वादश-वर्षेषु विकासक्षेत्रे, सांस्कृतिक-पुनरुज्जीवनक्षेत्रे, राष्ट्रिय-सुरक्षायां, वैश्विक-मान्यतायां च महती प्रगतिः अभवदिति। सः अवदत् यत् एतानि वर्षाणि देशस्य इतिहासे परिवर्तनशील-कालः इति स्मर्यते। कोल्हापुर-नगरे प्रायः सार्धचतुर्दशशत-कोटिरूप्यकाणां श्री-अम्बाबाई-मन्दिर-विकास-परियोजनायाः उद्घाटनानन्तरं जनसमूहं सम्बोधयन् श्रीशाहः अवदत् यत् विकास-परियोजनैषा ऐतिहासिक-सांस्कृतिक-आध्यात्मिक-परम्परायाः संरक्षणं कुर्वन्ती मन्दिर-परिसरं आधुनिक-तीर्थस्थानरूपेण परिवर्तयिष्यतीति।

---------------------------------------------------

## अन्ताराष्ट्रिय-योगदिवसः

षड्विंशत्यधिक-द्विसहस्रतमवर्षस्य अन्ताराष्ट्रिय-योगदिवसः श्वः सम्पूर्णे विश्वे आचर्यते। अस्मिन् वर्षे द्वादश: अन्ताराष्ट्रियः योगदिवसः आचर्यते, यस्य विषयः "स्वस्थ-जीवनाय योगः" इत्यस्ति,

यो हि समेषाम् आयुवर्गाणां कृते योगस्य महत्त्वं प्रतिपादयति। उत्सवस्यांश-रूपेण, संस्कृति-मन्त्रालयः, भारतस्य समृद्धां सांस्कृतिक-योगपरम्परां च सङ्गृह्य, देशस्य शत-प्रतिष्ठितस्थानेषु अन्ताराष्ट्रिय-योगदिवसस्य विशेषकार्यक्रमाणां आयोजनं करिष्यति।

---------------------------------------------

## राष्ट्रपतिनः म.प्र. भ्रमणम्

राष्ट्रपतिपदासीना द्रौपदीमुर्मुः श्वः मध्यप्रदेशस्य जबलपुर-नगरे राज्यस्तरीयस्य अन्ताराष्ट्रिय-योगदिवसस्य कार्यक्रमे मुख्यातिथिरूपेण स्थास्यति। कार्यक्रमः प्रातः सार्धसप्तवादनतः सदर्-क्षेत्रस्य गैरिसन्-ग्राउण्ड् इत्यत्र आरप्स्यते। अद्य सायङ्काले राष्ट्रपतिः तत्र प्राप्स्यति, यत्र राज्यपालः मङ्गुभाई पटेलः विमानस्थानके तस्याः स्वागतम् करिष्यति।

---------------------------------------------

## ब्रिक्स एनएसए उपवेशनम्

भारतम् सोमवासरादारभ्य द्वि-दिवसीयं ब्रिक्स्-राष्ट्रिय-सुरक्षा-परामर्शकानां सम्मेलनम् आयोजयिति। अस्य सम्मेलनस्य अध्यक्षः राष्ट्रिय-सुरक्षा-परामर्शकः अजित-डोभालः भविष्यति। सम्मेलनावसरे, राष्ट्रिय-सुरक्षा-परामर्शकाः, ब्रिक्स् सदस्यराष्ट्राणां प्रतिनिधिमण्डल-प्रमुखाश्च "अद्य जगतः सम्मुखीकृताः अपारम्परिक-सुरक्षा-समस्याः" इति विषये विचार-विनिमयं करिष्यन्ति। राष्ट्रिय-सुरक्षा-परामर्शकाः, प्रतिनिधिसङ्घस्य प्रमुखाश्च आतङ्कवाद-निरोध-विषये, सूचना-सम्प्रेषण-तन्त्रज्ञानस्य उपयोगे सुरक्षाविषये सद्यः आयोजितेषु ब्रिक्स्-संयुक्तकार्यसमूहानां परिणामानाम् अपि समीक्षां करिष्यन्ति।

---------------------------------------------

## ऋतु

भारत-ऋतु-विज्ञान-विभागेन श्वःपर्यन्तम् उपहिमालयीय-पश्चिमवङ्गस्य सिक्किमराज्यस्य च पृथक्-पृथक् स्थानेषु अत्यधिकवृष्ट्यै रक्तवर्णीया पूर्वसन्चेतना प्रदत्ता अस्ति। ऋतु विभागेन दिने

केरल-माहे-तमिल्नाडु-पुदुचेरी-करैकल्-प्रदेशेषु पूर्वोत्तरभागेषु च प्रचण्डवृष्टेः पूर्वानुमानं प्रकटितम् अस्ति। हरियाणा, चण्डीगढ, पञ्जाब, दिल्ली, उत्तराखण्ड, पूर्वीमध्यप्रदेश, जम्मू-कश्मीर, लद्दाख, हिमाचलप्रदेशेषु च विद्युद्योतनेन सह मेघगर्जनस्य सम्भावना ऋतु-विभागेन प्रकटिता। बिहार, आन्ध्रप्रदेश, उत्तरान्तरिक-कर्नाटक, तेलङ्गाना, विदर्भ, अण्डमान्-निकोबार्-द्वीपेषु च आगामि दिनद्वयोः एतादृशी स्थितिः भविष्यति।

---

<u>फीफा:</u>

ब्राजील्-देशः अद्य फिलाडेल्फिया-क्रीडाङ्गणे हैती-देशस्य उपरि त्रीणि-शून्यम् इत्यङ्कैः सहजतया विजयं प्राप्य फ़ीफ़ा-विश्वकप्-क्रीडायां स्वस्य प्रथमं विजयम् अभिलिखत्। मैथ्यूस कुन्हा इत्येषः पञ्चवारं यावत् विश्वविजेतृणां कृते उत्कृष्ट प्रदर्शनम् अकरोत्, प्रथमार्धे द्विवारं गोल् इति कृतवान्।

।। इति वार्ता: ।।